Vidhyayana - ISSN 2454-8596
An International Multidisciplinary Peer-Reviewed E-Journal
www.vidhyayanaejournal.org
Indexed in: ROAD & Google Scholar

# तत्त्वत्रयं पञ्चभेदाश्च

**स्वामी स्वरूपदासजी**

अनुसंधान विद्वान

संस्कृत विभाग

वीर नर्मद दक्षिण गुजरात विश्वविद्यालय

Vidhyayana - ISSN 2454-8596
An International Multidisciplinary Peer-Reviewed E-Journal
www.vidhyayanaejournal.org
Indexed in: ROAD & Google Scholar

**तत्त्वज्ञानान्निःश्रेयसाधिगमः (गौ.न्या.सू.–१/१/१)** एवं **"ऋते ज्ञानान्न मुक्तिः (हिर.के.शा.)"** इति श्रुतिस्मृतिवचोभिः तत्त्वज्ञानमन्तरा निःश्रेयसस्य दुष्करत्वं प्रपञ्चि । किन्नाम तत्त्वम् ? इति जिज्ञासा समाधीयते वैयाकरणैः नैयायिकैश्च ।

– तस्य (पदार्थस्य) भावः तत्त्वमिति व्युत्पत्तिः व्याकरणशास्त्रे ।

– **सत् सदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति, असच्च असदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति (न्या.भा. १–१–१)** इति हि महानैयायिकाः ।

अहो ! तत्त्वमीमांसा महाटवी । यतस्सकलसिद्धान्ते तत्त्वगणना तावत्पृथक् । परं सनातनवैदिकारण्ये **"चिद्, अचिद्, परमेश्वरः"** इति तत्त्वत्रयं प्रथितमस्ति ।

स्वामिनारायणसम्प्रदायेऽपि निगदितानि इमानि त्रीणि तत्त्वान्येव । परं सम्प्रदायेऽस्मिन् तत्त्वत्रयस्यैव पञ्चभेदाः प्रोक्ताः ।



**"जीवेश्वरब्रह्मपरब्रह्ममाया"** इति पञ्चभेदास्सन्ति । अत्र तावच्चित्तत्त्वस्य "जीवेश्वरब्रह्म" इति त्रयोऽनादिभेदप्रवाहास्सन्ति ।

ननु विशिष्टाद्वैतनये **"चिदचिद्विशिष्टं ब्रह्म"** इति एकमेव परमं तत्त्वम् । एवं सति त्रीणि तत्त्वानि पञ्च भेदा वा कथं स्युरिति चेत्तत्तु सत्यम् । परमं तत्त्वं तावदेकमेव । किञ्च 'परम' पदमेव अन्येषामपि अपरमतत्त्वानां सद्भावम् ज्ञापयति ।

**नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । (कठ. उ. - २/२/१३)**

**सत्यस्य सत्यम् । (बृ.उ.-२/१/२०)**

इति श्रुतिवचसा परब्रह्मणः परमसत्यत्वम् इतरेषां सत्यत्वं निगद्यते ।

**जीवनिरूपणम्**

सनातनवैदिकधारायामादौ चित्तत्त्वान्तर्गतप्रथमो जीवभेदस्तावन्निरूप्यते । भवदहनशिखाचक्रवालान्तराले दग्धभूतात्मनोऽपवर्गाय "ज्ञाता, ज्ञानं, ज्ञेयम्" इति त्रिपुटीस्थज्ञातृज्ञानमपेक्षितम् । **"एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यङ्कल्पः (छा.उ. ८/७/१) "** इति प्रजापतिवाक्योदितगुणाष्टकमाविर्भवितुमात्मनोऽवबोधोऽपेक्षितः ।

- **जीवस्वरूपम्**

स्वामिनारायणपरमात्मना विरचितशिक्षापत्र्यां जीवस्वरूपं वर्णयन्नुच्यते । यथा -

**हृत्स्थोऽणुसूक्ष्मश्चिद्रूपो ज्ञाता व्याप्याखिलां तनुम् ।**

**ज्ञानशक्त्या स्थितो जीवो ज्ञेयोऽच्छेद्यादिलक्षणः ॥ (शिक्षा. – १०५)**

**हृत्स्थः** – हृदयकमले तिष्ठतीति हृत्स्थः। "योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः

(बृ. उ.–४/३/७) " इति श्रुतेः।

**अणुसूक्ष्मः** – अणुवत्सूक्ष्म इत्यणुसूक्ष्मः (कर्म.), अणुपरिमाण इत्यर्थः।

"एषोऽणुरात्मा चेतसा वेदितव्यः (मु.उ.–३/१/९)" इति श्रुतेः। अणुश्चासौ सूक्ष्मश्च इति विशेषणोभयपदकर्मधारयो वा, तत्राणुरिति परिमाणविशेषः, एवं सूक्ष्म इति समेषु सूक्ष्मतमपदार्थेष्वपि व्याप्त्यर्हत्वम्।

**चिद्रूपः** – चिदेव (चैतन्यमेव) रूपं (स्वरूपं) यस्य स चिद्रूपः, ज्ञानस्वरूप इति यावत्।

"विज्ञानात्मा पुरुषः (प्र.उ. ४/९)" इति श्रुतेः। अनेन जीवस्य प्रकाशस्वरूपत्वमपि प्रत्यपादि।

**ज्ञाता** – जानातीति ज्ञाता। जीवात्मा ज्ञानस्वरूपस्सन् ज्ञानाश्रयोऽपि स्यादिति अस्माकं सिद्धान्ते। दीपवत् – यथा दीपः प्रभाश्रयस्सन् प्रभास्वरूपोऽपि। "एष हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः। (प्र.उ. ४/९)" इति श्रुतेः। 'ज्ञानस्वरूप' इत्यत्र ज्ञानं नाम धर्मिभूतज्ञानम्। 'ज्ञानाश्रय' इत्यत्र ज्ञानं नाम धर्मभूतज्ञानम्।

**ज्ञानशक्त्या अखिलां तनुं व्याप्य स्थितः** – ज्ञानमय्या स्वप्रभया आमूलचूडमखिलं देहमभिव्याप्य तिष्ठति।

**अच्छेद्यादिलक्षणः ज्ञेयः** – छेत्तुं शक्यश्छेद्यः, न छेद्य इति अछेद्यः, अच्छेद्य आदिर्येषाम् अच्छेद्यत्वादीनि इत्यर्थः। तानि एव लक्षणं स्वभावो यस्य सः। "नैनं छिन्दन्ति शस्त्राणि...... (भ.गी.–२/२३)।" इति स्मृत्या जीवात्मनो नित्यत्वं सिद्धमिति।

Vidhyayana - ISSN 2454-8596
An International Multidisciplinary Peer-Reviewed E-Journal
www.vidhyayanaejournal.org
Indexed in: ROAD & Google Scholar

जीवस्वरूपं तावद्वचनामृते **''सच्चिदानन्दम्''** इति शब्देन भण्यते ।

'सत्' शब्देन त्रिकालातीतः स्वीक्रियते जीवात्मा । 'चित्' शब्देन ज्ञानस्वरूपं ज्ञानाश्रयश्च व्याख्यायते । ''जीवा न नरा, न स्त्रियः, परं जीवस्तावत् सत्तामात्रं चैतन्यस्वरूपोऽस्ति (दुर्ग.अं.वच.-२२)'' इति भगवदुक्तत्वात् । 'आनन्द' शब्देन जीवात्मनः स्वाभाविकानन्दस्वरूपं वर्ण्यते । ''आनन्दो ब्रह्मेति व्यजानात् (तै.भृ.-६)'' इति श्रुतेः ।

छान्दोग्योपनिषदि ''य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः (छा.उ.-८/७/१) '' इति श्रुत्या **जीवस्वरूपं** तावद् **गुणाष्टकविशिष्टं** न्यरूपि ।

**ईश्वरनिरूपणम्**

सनातनतत्त्वत्रयान्तर्गते चित्तत्व ईश्वराख्यो द्वितीयभेदस्समुपवर्ण्यते । जीववद् ईश्वरोऽपि नित्यः, सनातन, अनादिः, अनन्तश्च । नित्यत्वं नाम प्रागभावप्रध्वंसाभावरहितः । न्यरूपि तावद् ईश्वरस्य अनादित्वं श्रीहरिवाक्यसुधासिन्धौ । यथा –

**''जीवेशब्रह्मकृष्णानां मायायाश्चापि वास्तवः ।**

**अस्त्यनादिरयं भेद इति जानीहि निश्चितम् ॥''**

**(श्रीहरि त. ७/१७)**

- **ईश्वरस्वरूपम्**

श्रीमद्भागवतादिपुराणेषु अन्यश्रुतिस्मृतिग्रन्थेषु ब्रह्माण्डाभिमानी यो जीवो वर्ण्यते, स एव ईश्वरः । **''वैराजनारायणः, विराट्पुरुषः, हिरण्यगर्भः''** इत्याख्या अपरा तस्य ।

Vidhyayana - ISSN 2454-8596
An International Multidisciplinary Peer-Reviewed E-Journal
www.vidhyayanaejournal.org
Indexed in: ROAD & Google Scholar

श्रीमत्सत्सङ्गिजीवनाख्ये सम्प्रदायसुप्रसिद्धधर्मग्रन्थे ईश्वरस्वरूपं निगद्यते । यथा –

**देहत्रये विराडादौ व्याप्योत्पत्तिस्थितिक्षयान् ।**

**करोति जगतां यस्तु सर्वज्ञो ज्ञेय ईश्वरः ॥**

**(स.जी. १/५१/२९)**

विराडादिदेहत्रयमभिव्याप्य जगतां जन्मस्थितिलयान् विदधाति अयमीश्वरः । सर्वज्ञपदेन **"बहुज्ञ"** इत्यर्थो ग्रहणीयः । यतः "यः सर्वज्ञः सर्वविच्च । (मुण्ड.उ.–१/१/९)" इति श्रुत्यनुसारेण सर्वज्ञत्वं नारायणस्यैव, न तु अन्यस्य कस्यचन । अथवा निरवच्छिन्नसार्वज्ञ्यं सावच्छिन्नसार्वज्ञ्यमिति भेदद्वयं स्वीकृत्य साधीयश्चार्थः । परमपुरुषोत्तमस्य नारायणस्य निरवच्छिन्नसार्वज्ञ्यम् ईश्वरस्य सावच्छिन्नसार्वज्ञ्यम् – इति विरोधोपशमः ।

**ब्रह्मनिरूपणम्**

इदमिदानीं निरूप्यते चित्तत्त्वान्तर्गते ब्रह्मस्वरूपम् । चिन्नाम चैतन्यम् । चैतन्यं तावद् ज्ञानस्वरूपं ज्ञानाश्रयं वा ।

सम्प्रदायेऽस्माकं ब्रह्मशब्देन **"अक्षरब्रह्म"** इत्येका गणना सुप्रसिद्धा । तथापि **"महापुरुषः (मूलपुरुषः), महाकालः"** इत्यनयोरपि गणना साम्प्रदायिकशास्त्रेषु क्वचित् समुपलभ्यते ।

**● ब्रह्म(अक्षरब्रह्म)स्वरूपम्**

ऐकान्तिकभक्तः स्वदेहं विहाय अर्चिमार्गेण भगवद्धाम अवाप्नोति तद्धामैव "अक्षरब्रह्म" शब्देन निगद्यते ।

शतानन्दमुनिविरचिते श्रीमत्सङ्गिजीवनाख्ये ग्रन्थे ब्रह्मस्वरूपं कथितमस्ति ।

**सत्यं ज्ञानमनन्तं च पूर्णं चाखण्डमक्षरम्।**

**धाम यद्वासुदेवस्य मूर्तं चामूर्तमुच्यते॥**

**शुद्धं नित्यं चाविकारि मायादीनां प्रकाशकम्।**

**तद्ब्रह्मेति विजानीहि सर्वाधारतया मतम्॥**

**(स.जी.-१/५१/३२)**

सत्यं ज्ञानमनन्तमिति शब्दैः अक्षरब्रह्म सत्यस्वरूपं, चिद्रूपम्, अपरिच्छिन्नं सिद्धम्। तथैव सर्वव्यापकम्, अविनाशी, च्युतिवर्जितं, भगवतः धामविशेषं, मूर्तामूर्तद्वयात्मकं, त्रिगुणातीतं, सनातनं, पापादिविकारवर्जितं, प्रकृत्यादीनां प्रवर्तकं, सर्वलोकाद्यधिकरणत्वेन अक्षरब्रह्म विजानीयात्। निरूप्यतेऽग्रे कानिचित्पदानि विस्तरशः।

**● एकमेवाऽद्वितीयम् अक्षरब्रह्म**

ननु जीवानामनेकत्वं साधितम् एवं ब्रह्माण्डानामनेकत्वात् ब्रह्माण्डाभिमानिवैराजनारायणस्य (ईश्वरस्य) अपि साधितमनेकत्वम्। तथैव अक्षरब्रह्मणोऽपि अनेकत्वं स्यादिति चेत् –

माऽस्तु भोः। अक्षरमुक्तानामनेकत्वं भवतु। परं अक्षरब्रह्म तु एकमेव। भवतु अक्षरमुक्तानाम् अक्षरब्रह्मणा साकं साधर्म्यम्। तथापि एकत्वम् अद्वितीयत्वमक्षुण्णमेव अक्षरब्रह्मणः।

पूर्वं तावद् अक्षरमुक्त-अक्षरब्रह्मणोः भेदो व्याख्यानीयः। परमात्मन उपासनेन मुक्तभावमापन्ना भगवद्धामविशेषप्राप्ता एव अक्षरमुक्ताः। ते त्वनन्ताः। परम् अक्षरब्रह्म तावदेकमेव नित्यञ्च। ''हरिः स्वकीयाऽक्षरधाम्नि

अक्षरभावाऽऽपन्नमुक्तकोटिभिः मूर्तेनाऽक्षरब्रह्मणा च छन्दानुवृत्तितया कृतपरिचर्यः (श्रीहरि.सेतु.–५९/५) ।" इति वाक्य अक्षरभावापन्नमुक्तानामनेकत्वम् एवमक्षरब्रह्मण एकत्वमुदीरितम् ।

**परब्रह्मनिरूपणम्**

इदमिदानीं व्याख्यायते परमप्राप्यम्, उपासकानां कृते उपास्यतत्त्वं, परमरहस्यमयं परब्रह्मतत्त्वम् । भवाब्धौ भ्रमितात्मनां कृते भवमोचनाय भणितमस्ति भूभर्तृज्ञानम् ।

ननु ज्ञानं वर्तते तावज्जीवे, न तु परब्रह्मणि । तर्हि मुक्तिमीमांसायां किमावश्यकता परब्रह्मज्ञानस्य इति चेत्; तत्रोच्यते ज्ञानमस्ति आत्मनि **समवायेन**, परं **विषयतासम्बन्धेन** ज्ञानमस्ति परमात्मनि । यतः परब्रह्मविषयकज्ञानमेव असाधारणकारणमस्ति मोक्षाय । अतः तावन्निरूप्यते परब्रह्मस्वरूपम् ।

- **परब्रह्मस्वरूपम्**

श्रीमत्सत्सङ्गिजीवनाख्ये प्रधानभूतग्रन्थे नीलकण्ठप्रभुमुक्तानन्दस्वामिनोः संवादे मुक्तानन्दस्वामी परब्रह्मस्वरूपं निरूपयन्नाह ।

**सर्वज्ञः सत्यसङ्कल्पः सर्वकर्मफलप्रदः ।**

**अन्तर्यामी सर्वशक्तिसेवितः परमेश्वरः ॥**

**सर्वत्रैवान्वितः शक्त्या व्यतिरिक्तः स्वतः स्थितः ।**

**नियन्ता कालमायादेः सर्वकारणकारणम् ॥**

Vidhyayana - ISSN 2454-8596
An International Multidisciplinary Peer-Reviewed E-Journal
www.vidhyayanaejournal.org
Indexed in: ROAD & Google Scholar

**परमात्मेति यत्प्राहुस्तत्परं ब्रह्म कथ्यते ।**

**उपासनीय  सर्वेषामेतदेव मुमुक्षताम् ॥**

**(स. जी. १/५१/३५,३६,३७)**

**सर्वज्ञः** – सर्वं जानाति वेत्तीति सर्वज्ञः । ‘‘यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः (न्यायतत्त्व)’’ इति श्रुतेः ।

**सत्यसङ्कल्पः** – सत्यः सङ्कल्पो (मनोरथो) यस्य सः । ‘‘अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः (छां.उ–८/७/१) ‘‘ इति श्रुतौ निर्दिष्टगुणाष्टके सत्यसङ्कल्पशब्दोल्लेखो दृश्यते ।

**सर्वकर्मफलप्रदः** – समेषां देहिनां यथाकर्म तथाफलं प्रददाति नारायणः ।

**अन्तर्यामी** – अन्तः प्रविश्य यमयति नियमयतीत्यन्तर्यामी ।

**सर्वशक्तिसेवितः** – सर्वाभिः राधारमादिशक्तिभिः सेवितः परिचरितः पुरुषोत्तमो नारायणः ।

**परमेश्वरः** – परमश्चासौ ईश्वर इति परमेश्वरः, सर्वेश्वर इत्यर्थः । ‘‘तमीश्वराणां परमं महेश्वरम् (श्वे.उ.–६/७ )’’ इति श्रुतेः ।

**सर्वत्र** अक्षरब्रह्मणि जीवेश्वरयोः मायातत्कार्येषु सकलचराचरविश्वेषु स्वासाधारणयोगैश्वर्यशक्त्या अन्तर्यामिशक्त्या वा स्थितस्सन्नपि स्वरूपतः ततो भिन्न इत्यर्थः । कालप्रकृत्यादीनां नियन्ता उपादानादिसकलकारणानां कारणञ्च इत्यर्थः । वेदादय एनं ‘‘परमात्मा परं ब्रह्म वासुदेव भगवान् पुरुषोत्तमः’’ इत्याख्याभिः कथयन्ति । आत्यन्तिकमोक्षेप्सूनां कृते स नारायण एव उपास्यः । विस्तरशो निरूप्यतेऽग्रे ।

VIDHYAYANA

**Vidhyayana - ISSN 2454-8596**

An International Multidisciplinary Peer-Reviewed E-Journal

**www.vidhyayanaejournal.org**

**Indexed in: ROAD & Google Scholar**

**मायानिरूपणम्**

इदमिदानीं निरूप्यते परमहेयं, परमप्राप्यप्राप्तौ परमप्रतिबन्धकरूपमचित्तत्वम् । सम्प्रदायेऽस्मिन् ''माया, मूलमाया, महामाया, प्रकृतिः, मूलप्रकृतिः, अविद्या'' इति पर्यायैः निरूप्यमाणमिदमचित्तत्वम् ।

ननु ''प्राप्यं ज्ञेयं, न तु हेयं ज्ञेयम्'' यतः प्राप्ते ज्ञेये सति हेयं हीनं तु स्वतः, तर्हि कुतो ज्ञेयत्वेन वर्णितमस्ति इदमचित्तत्वम् ? तदुत्तरं द्वादशतमे वचनामृते भगवान् श्रीस्वामिनारायण उवाच – **''जगत्कारणभूतानां प्रकृतिपुरुषकालमहत्तत्वादिचतुर्विंशतितत्त्वानां ज्ञानं यदा भवति, तदा स्वस्थाविद्यायाः तत्कार्यभूतचतुर्विंशतितत्त्वानां बन्धनान्निर्मुक्तो भवति (दुर्ग. प्र. १२) ।''**

- **मायास्वरूपम्**

श्रीहरिवाक्यसुधासिन्धौ शतानन्दमुनिः मायास्वरूपं सलक्षणं निरूपयन्नाह –

**नित्या च भगवच्छक्तिस्त्रिगुणा चिज्जडात्मिका ।**

**निर्विशेषा जीवमहत्तत्त्वादिक्षेत्रमव्यया ॥**

**(श्रीहरि. त. १२/८)**

**इत्थं स्वामिनारायणवेदान्तानुसारेण** तत्त्वत्रयं पञ्चभेदाश्च निरूपिताः ।